श्री दंडायुधपाण्यष्टकं

श्री दंडायुधपाण्यष्टकं

यः पूर्वं शिवशक्तिनामकगिरिद्वंद्वे हिडिंबासुरे-
-णानीते फळिनीस्थलांतरगते कौमारवेषोज्ज्वलः |
आविर्भूय घटोद्भवाय मुनये भूयो वरान् प्रादिशत्
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 1 ||

श्रीमत्पुष्यरथोत्सवेऽन्नमधुदुग्धाद्यैः पदार्थोत्तमैः
नानादेशसमागतैरगणितैर्यः कावडीसंभृतैः |
भक्तौघैरभिषेचितो बहुवरांस्तेभ्यो ददात्यादरात्
श्रीदंडायुधपाणिरात्तकरुणः पायादपायत्स मां || 2 ||

नानादिग्भ्य उपागता निजमहावेशान्विताः सुंदरीः
तासामेत्य निशासु यः सुमशरानंदानुभूतिच्छलात् |
गोपीनां यदुनाथवन्निजपरानंदं तनोति स्फुटं
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 3 ||

दुष्टानामिह भूतभाविभवतां दुर्मार्गसंचारिणां
कष्टाहंकृतिजन्यकिल्बिषवशाच्छिष्टप्रविध्वंसिनां |
शिक्षार्थं निजपाणिनोद्वहति यो दंडाभिधानायुधं
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 4 ||

पूर्वं तारकसंज्ञकं दितिसुतं यः शूरपद्मासुरं
सिंहास्यं च निहत्य वासवमुखान् देवान् जुगोपाखिलान् |
श्रीवल्ल्या सहितश्च निस्तुलयशाः श्रीदेवसेन्या युतः
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 5 ||

यस्यांगस्थितरोमकूपनिकरे ब्रह्मांडकोटिच्छटाः
सौधाग्रस्थगवाक्षरंध्रविचरत्पीलूपमा एव ताः |
लक्ष्यंते यमिदृग्भिरात्मनि तथाभूतस्वविश्वाकृतिः
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 6 ||

सद्योजातमुखैश्च पंचवदनैः शंभोः सहैकं मुखं
पार्वत्या मिलितं विभाति सततं यद्वक्त्रषट्कात्मना |
तत्तादृक् च्छिवशक्त्यभेदविषयव्यक्त्युज्ज्वलांगं वहन्
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 7 ||

सत्यं ज्ञानमनंतमद्वयमिति श्रुत्यंतवाक्योदितं
यद्ब्रह्मास्ति तदेव यस्य च विभोर्मूर्तेः स्वरूपं विदुः |
योगींद्रा विमलाशया हृदि निजानंदानुभूत्युन्नताः
श्रीदंडायुधपाणिरात्तकरुणः पायादपायात्स मां || 8 ||

इदं श्रीफळिनीदंडायुधपाण्यष्टकस्तवं |
पठतामाशु सिद्ध्यंति निखिलाश्च मनोरथाः || 9 ||

इति श्रीदंडायुधपाण्यष्टकं |